# rAmasahasranAmastotram from bhuShuNDirAmAya

# રામસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

## Document Information

Text title : rAmasahasranAmastotram 4 from bhushuNDIrAmAyaNa

File name : rAmasahasranAmastotrambhushuNDIrAmAyaNa.itx

Category : raama, sahasranAma

Location : doc_raama

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Source : Bhushundi Ramayanam pUrvakhaNDa, adhyAYa 13

Latest update : February 25, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2021

*sanskritdocuments.org*

# રામસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

ત્રયોદશોઽધ્યાયઃ

બ્રહ્મોવાચ -

અથ ત્રયોદશતમે દિને નામવિધિત્સયા ।
કુમારાણાં સુજનુષાં પરમાયુશ્ચિકીર્ષયા ॥ ૧॥

વસિષ્ઠો વંશપૌરોધાઃ મુદાયુક્તઃ સમાયયૌ ।
રાજ્ઞો દશરથસ્યાન્તઃપુરે સર્વસમર્દ્ધને ॥ ૨॥ var સમૃધ્દ્ને

સમાયાતં મુનિધેષ્ઠં રાજા દશરથોઽગ્રહીત્ ।
અહો મે ભાગ્યસંપત્યા સઙ્ગતોઽદ્ય પુરોહિતઃ ॥ ૩॥

પ્રાજાપત્યો મુનિશ્રેષ્ઠઃ પરમાનન્દદર્શનઃ ।
નમસ્તે મુનિશાર્દૂલ પ્રાજાપત્ય મહાપ્રભ ॥ ૪॥ var મહાપ્રભો

વસિષ્ઠ ઉવાચ -

નરેન્દ્ર વત તે ભાગ્યં જાતોઽસિ તનુ પુત્રવાન્ ॥ ૫॥

તેષામહં કુમારાણાં નામકૃત્યં સુખપ્રદમ્ ।
તવાજ્ઞયા વિધાસ્યામિ યદ્રોપ્યમમરૈરપિ ॥ ૬॥

અહો અમી પ્રભોરંશા રામસ્યામિતતેજસઃ ।
યોઽસૌ તવ કુમારાણામગ્રણી રામ એવ સઃ ॥ ૭॥

અસ્ય ચત્વાર એવાંશાઃ બ્રહ્મરૂપાઃ સનાતનાઃ ।
વાસુદેવઃ સંકર્ષણઃ પ્રદ્યુમ્નશ્ચાનિરુદ્ધકઃ ॥ ૮॥

ચત્વાર એતે પુરુષાઃ સ્વસ્વકાર્યવિધાયકાઃ ।
ધર્મરૂપાસ્તુ રામસ્ય પુરુષોત્તમરૂપિણઃ ॥ ૯॥

તતઃ સંસ્તાતસંસ્કારાન્ મન્ત્રિતાન્ વિધિવર્ત્મના ।
નામાનિ ચક્રે વ્રહ્મર્ષિઃ કોટિકલ્પવિદુત્તમઃ ॥ ૧૦॥

વસિષ્ઠ ઉવાચ -
રામઃ શ્યામો હરિર્વિષ્ણુઃ કેશવઃ કેશિનાશનઃ ।
નારાયણો માધવશ્ચ શ્રીધરો મધુસૂદનઃ ॥ ૧૧॥

રાવણારિઃ કંસનિહા વકીપ્રાણનિવર્ત્તનઃ ।
તાડકાહનનોદ્યુક્તો વિશ્વામિત્રપ્રિયઃ કૃતી ॥ ૧૨॥

વેદાઙ્ગો યજ્ઞવારાહો ધર્મજ્ઞો મેદિનીપતિઃ ।
વાસુદેવોઽરવિન્દાક્ષો ગોવિન્દો ગોપતિઃ પ્રભુઃ ॥ ૧૩॥

પદ્માકાન્તો વિકુણ્ઠાભૂઃ કીર્તિકન્યાસુખપ્રદઃ ।
જાનકીપ્રાણનાથશ્ચ સીતાવિશ્લેષનાશનઃ ॥ ૧૪॥

મુકુન્દો મુક્તિદાતા ચ કૌસ્તુભી કરુણાકરઃ ।
ખરદૂષણનાશી ચ મારીચપ્રાણનાશકઃ ॥ ૧૫॥

સુબાહુમારણોત્સાહી પક્ષિશ્રાદ્ધવિધાયકઃ ।
વિહઙ્ગપિતૃસમ્બન્ધી ક્ષણતુષ્ટો ગતિપ્રદઃ ॥ ૧૬॥

પૂતનામાતૃગતિદો વિનિવૃત્તતૃણાનિલઃ ।
પાવનઃ પરમાનન્દઃ કાલિન્દીજલકેલિકૃત્ ॥ ૧૭॥

સરયૂજલકેલિશ્ચ સાકેતપુરદૈવતઃ ।
મથુરાસ્થાનનિલયો વિશ્રુતાત્મા ત્રયીસ્તુતઃ ॥ ૧૮॥

કૌન્તેયવિજયોદ્યુક્તઃ સેતુકૃત્ સિન્ધુગર્ભવિત્ ।
સપ્તતાલપ્રભેદી ચ મહાસ્થિક્ષેપણોદ્ધુરઃ ॥ ૧૯॥

કૌશલ્યાનન્દનઃ કૃષ્ણઃ કિશોરીજનવલ્લભઃ ।
આભીરીવલ્લભો વીરઃ કોટિકન્દર્પવિગ્રહઃ ॥ ૨૦॥

ગોવર્દ્ધનગિરિપ્રાશી ગોવર્દ્ધનગિરીશ્વરઃ ।
ગોકુલેશો વ્રજેશશ્ચ સહજાપ્રાણવલ્લભઃ ॥ ૨૧॥

ભૂલીલાકેલિસન્તોષી વામાકોટિપ્રસાદનઃ ।
ભિલ્લપત્નીકૃપાસિન્ધુઃ કૈવર્ત્તકરુણાકરઃ ॥ ૨૨॥

જામ્બવદ્ભક્તિદો ભોક્તા જામ્બવત્યઙ્ગનાપતિઃ ।
સીતાપ્રિયો રુક્મિણીશઃ કલ્યાણગુણસાગરઃ ॥ ૨૩॥

ભક્તપ્રિયો દાશરથિઃ કૈટભારિઃ કૃતોત્સવઃ ।

કદમ્બવનમધ્યસ્થઃ શિલાસંતારદાયકઃ ॥ ૨૪॥

રાઘવો રઘુવીરશ્ચ હનુમત્સખ્યવર્દ્ધનઃ ।
પીતામ્બરોઽચ્યુતઃ શ્રીમાન્ શ્રીગોપીજનવલ્લભઃ ॥ ૨૫॥

ભક્તેષ્ટો ભક્તિદાતા ચ ભાર્ગવદ્વિજગર્વજિત્ ।
કોદણ્ડરામઃ ક્રોધાત્મા લઙ્કાવિજયપણ્ડિતઃ ॥ ૨૬॥

કુમ્ભકર્ણનિહન્તા ચ યુવા કૈશોરસુન્દરઃ ।
વનમાલી ઘનશ્યામો ગોચારણપરાક્રમી ॥ ૨૭॥

કાકપક્ષધરો વેષો વિટો ધૃષ્ટઃ શઠઃ પતિઃ ।
અનુકૂલો દક્ષિણશ્ચ તારઃ કપટકોવિદઃ ॥ ૨૮॥

અશ્વમેધપ્રણેતા ચ રાજા દશરથાત્મજઃ ।
રાઘવેન્દ્રો મહારાજઃ શ્રીરામાનન્દવિગ્રહઃ ॥ ૨૯॥

ક્ષત્રઃ ક્ષત્રકુલોત્તસો મહાતેજાઃ પ્રતાપવાન્ ।
મહાસૈન્યો મહાચાપો લક્ષ્મણૈકાન્તસુપ્રિયઃ ॥ ૩૦॥

કૈકેયીપ્રણનિર્માતા વીતરાજ્યો વનાલયઃ ।
ચિત્રકૂટપ્રિયસ્થાનો મૃગયાચારતત્પરઃ ॥ ૩૧॥

કિરાતવેષઃ ક્રૂરાત્મા પશુમાંસૈકભોજનઃ ।
ફલપુષ્પકૃતાહારઃ કન્દમૂલનિષેવણઃ ॥ ૩૨॥

પયોવ્રતો વિધાનજ્ઞઃ સદ્ધર્મપ્રતિપાલકઃ ।
ગદાધરો યજ્ઞકર્ત્તા શ્રાદ્ધકર્તા દ્વિજાર્ચકઃ ॥ ૩૩॥

પિતૃભક્તો માતૃભક્તો બન્ધુઃ સ્વજનતોષકૃત્ ।
મત્સ્યઃ કૂર્મો નૃસિંહશ્ચ વરાહો વામનસ્તથા ॥ ૩૪॥

રઘુરામઃ પરશુરામો બલરામો રમાપતિઃ ।
રામલિઙ્ગસ્થાપયિતા શિવભક્તિપરાયણઃ ॥ ૩૫॥ var રુદ્રમાહાત્મ્યવર્ધનઃ

ચણ્ડિકાર્ચનકૃત્યજ્ઞશ્ચણ્ડીપાઠવિધાનવિત્ ।
અષ્ટમીવ્રતકર્મજ્ઞો વિજયાદશમીપ્રિયઃ ॥ ૩૬॥

કપિસૈન્યસમારમ્ભી સુગ્રીવપ્રાણદઃ પરઃ ।
સૂર્યવંશધ્વજો ધીરો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૩૭॥

બ્રહ્માર્પણી બ્રહ્મહોતા બ્રહ્મકર્મવિદુત્તમઃ ।
બ્રહ્મજ્ઞો બ્રાહ્મણાચારઃ કૃતકૃત્યઃ સનાતનઃ ॥ ૩૮॥

સચ્ચિદાનન્દરૂપશ્ચ નિરીહો નિર્વિકારકઃ ।
નિત્યાકારો નિરાધારો રામો રમયતાં વરઃ ॥ ૩૯॥

રકારાદિર્મકારાદિઃ રામઃ કૈવલ્યમઙ્ગલઃ ।
સંદર્ભો સંશયચ્છેત્તા શેષશાયી સતાં ગતિઃ ॥ ૪૦॥

પુરુષઃ પુરુષાકારઃ પ્રમેયઃ પુરુષોત્તમઃ ।
વશીધરો વિહારજ્ઞો રસાનન્દીજિતસ્મરઃ ॥ ૪૧॥

પૂર્ણાતિથિવિનોદી ચ વૃન્દાવનવિલાસકૃત્ ।
રત્નકટકધરો વીરો મુક્તાહારવિભૂષણઃ ॥ ૪૨॥

નૃત્યપ્રિયો નૃત્યકરો નિત્યસીતાવિહારવાન્ ।
મહાલક્ષ્મીદૃઢાનન્દો પ્રમોદવનનાયકઃ ॥ ૪૩॥

પરપ્રેમા પરાનન્દઃ પરભક્તિસ્વરૂપકઃ ।
અગ્નિરૂપઃ કાલરૂપઃ પ્રલયાન્તમહાનલઃ ॥ ૪૪॥ var મહબલઃ

સુપ્રસન્નઃ પ્રસાદાત્મા પ્રસન્નાસ્યઃ પરઃ પ્રભુઃ ।
પ્રીતિઃ પ્રીતિ મનાઃ પ્રીતિઃ શકટાસુરભઞ્જનઃ ॥ ૪૫॥ var પ્રીતઃ પ્રીત મનાઃ

ખટ્વાસુરવધોદ્યુક્તઃ કાલરૂપો દુરન્તકઃ ।
હંસઃ સ્મરસહસ્રાત્મા સ્મરણીયો રુચિપ્રદઃ ॥ ૪૬॥

પણ્ડા પણ્ડિતમાની ચ વેદરૂપઃ સરસ્વતી ।
ગુહ્યાર્થદો ગુરુર્દેવો મન્ત્રજ્ઞો મન્ત્રદીક્ષિતઃ ॥ ૪૭॥

યોગજ્ઞો યોગવિન્નાથઃ સ્વાત્મયોગવિશારદઃ ।
અધ્યાત્મશાસ્ત્રસારજ્ઞો રસરૂપો રસાત્મકઃ ॥ ૪૮॥

શૃઙ્ગારવેશો મદનો માનિનીમાનવર્દ્ધનઃ ।
ચન્દનદ્રવસશીતશ્ચન્દનદ્રવલેપનઃ ॥ ૪૯॥

શ્રીવત્સલાઞ્છનઃ શ્રીમાન્ માની માનુષવિગ્રહઃ ।
કરણં કારણં કર્તાઽઽધારો વિધરણો ધરઃ ॥ ૫૦॥

ધરિત્રીધરણો ધીરઃ સ્ત્ર્યધીશઃ સત્યવાક્ પ્રિયઃ ।
સત્યકૃત્ સત્રકર્તા ચ કર્મી કર્મવિવર્દ્ધનઃ ॥ ૫૧॥

કાર્મુકી વિશિખી શક્તિધરો વિજયદાયકઃ
ઊર્જ્જસ્વલો બલી જિષ્ણુર્લઙ્કેશપ્રાણનાશકઃ ॥ ૫૨॥

શિશુપાલપ્રહન્તા ચ દન્તવક્ત્રવિનાશનઃ ।
પરમોત્સાહનોઽસહ્યઃ કલિદોષવિનાશનઃ ॥ ૫૩॥ var પરમોત્સાહનો સત્ત્વ

જરાસન્ધમહાયુદ્ધો નિઃકિંચનજનપ્રિયઃ । var યોદ્ધા
દ્વારકાસ્થાનનિર્માતા મથુરાવાસશૂન્યકૃત્ ॥ ૫૪॥

કાકુત્સ્થો વિનયી વાગ્મી મનસ્વી દક્ષિણાપ્રદઃ ।
પ્રાચ્યવાચીપ્રતીચ્યુક્તદક્ષિણો ભૂરિદક્ષિણઃ ॥ ૫૫॥

દક્ષયજ્ઞસમાનેતા વિશ્વકેલિઃ સુરાર્ચિતઃ ।
દેવાધિપો દિવોદાસો દિવાસ્વાપી દિવાકરઃ ॥ ૫૬॥

કમલાક્ષઃ કૃપાવાસો દ્વિજપત્નીમનોહરઃ ।
વિભીષણશરણ્યશ્ચ શરણં પરમા ગતિઃ ॥ ૫૭॥

ચાણૂરબલનિર્માથી મહામાતઙ્ગનાશનઃ ।
બદ્ધકક્ષો મહામલ્લી મલ્લયુદ્ધવિશારદઃ ॥ ૫૮॥

અપ્રમેયઃ પ્રમેયાત્મા પ્રમાણાત્મા સનાતનઃ ।
મર્યાદાવતરો વિજ્ઞો મર્યાદાપુરુષોત્તમઃ ॥ ૫૯॥

મહાક્રતુવિધાનજ્ઞઃ ક્રતુકર્મા ક્રતુપ્રિયઃ ।
વૃષસ્કન્ધો વૃષસ્કન્દો વૃષધ્વજમહાસખઃ ॥ ૬૦॥

ચક્રી શાર્ઙ્ગી ગદાપાણિઃ શઙ્ખભૃત્ સુસ્મિતાનનઃ ।
યોગધ્યાની યોગગમ્યો યોગાચાર્યો દૃઢાસનઃ ॥ ૬૧॥

જિતાહારો મિતાહારઃ પરહા દિગ્જયોદ્ધુરઃ ।
સુપર્ણાસનસંસ્થાતા ગજાભો ગજમોક્ષણઃ ॥ ૬૨॥

ગજગામી જ્ઞાનગમ્યો ભક્તિગમ્યો ભયાપહઃ ।
ભગવાન્ સુમહૈશ્વર્યઃ પરમઃ પરમામૃતઃ ॥ ૬૩॥

સ્વાનન્દી સચ્ચિદાનન્દી નન્દિગ્રામનિકેતનઃ ।
વર્હોત્તંસઃ કલાકાન્તઃ કાલરૂપઃ કલાકરઃ ॥ ૬૪॥

કમનીયઃ કુમારાભો મુચુકુન્દગતિપ્રદઃ ।

મુક્તિભૂરિફલાકારઃ કારુણ્યધૃતવિગ્રહઃ ॥ ૬૫॥

ભૂલીલારમણોદ્યુક્તઃ શતધાકૃતવિગ્રહઃ ।
રસાસ્વાદી રસાનન્દી રસાતલવિનોદકૃત્ ॥ ૬૬॥

અપ્રતર્ક્યઃ પુનીતાત્મા વિનીતાત્મા વિધાનવિત્ ।
ભુજ્યુઃ સભાજનઃ સભ્યઃ પણ્ડઃ પણ્ડુર્વિપણ્યજઃ ॥ ૬૭॥

ચર્ષણી ઉત્કટો વીતો વિત્તદઃ સવિતાઽવિતા ।
વિભવો વિવિધાકારો રામઃ કલ્યાણસાગરઃ ॥ ૬૮॥

સીતાસ્વયવરોદ્યુક્તો હરકાર્મુકભઞ્જનઃ ।
રાવણોન્માદશમનઃ સીતાવિરહકાતરઃ ॥ ૬૯॥

કુમારકુશલઃ કામઃ કામદઃ કોતિવર્દ્ધનઃ ।
દુર્યોધનમહાવૈરી યુધિષ્ઠિરહિતપ્રદઃ ॥ ૭૦॥

દ્રૌપદીચીરવિસ્તારી કુન્તીશોકનિવારણઃ ।
ગાન્ધારીશોકસંતાનઃ કૃપાકોમલમાનસઃ ॥ ૭૧॥

ચિત્રકૂટકૃતાવાસો ગઙ્ગાસલિલપાવનઃ ।
બ્રહ્મચારી સદાચારઃ કમલાકેલિભાજનઃ ॥ ૭૨॥

દુરાસદઃ કલહકૃત્ કલિઃ કલિવિનાશનઃ ।
ચારી દણ્ડાજિની છત્રી પુસ્તકી કૃષ્ણમેખલઃ ॥ ૭૩॥ var બ્રહ્મચારી દણ્ડછત્રી

દણ્ડકારણ્યમધ્યસ્થઃ પઞ્ચવટ્યાલયસ્થિતઃ ।
પરિણામજયાનન્દી નન્દિગ્રામસુખપ્રદઃ ॥ ૭૪॥

ઇન્દ્રારિમાનમથનો બદ્ધદક્ષિણસાગરઃ ।
શૈલસેતુવિનિર્માતા કપિસૈન્યમહીપતિઃ ॥ ૭૫॥

રથારૂઢો ગજારૂઢો હયારૂઢો મહાબલી ।
નિષઙ્ગી કવચી ખડ્ગી ખલગર્વનિવહણઃ ॥ ૭૬॥

વેદાન્તવિજ્ઞો વિજ્ઞાની જાનકીબ્રહ્મદર્શનઃ ।
લઙ્કાજેતા વિમાનસ્થો નાગપાશવિમોચકઃ ॥ ૭૭॥

અનન્તકોટિગણભૂઃ કલ્યાણઃ કેલિનીપતિઃ ।
દુર્વાસાપૂજનપરો વનવાસી મહાજવઃ ॥ ૭૮॥

સુસ્મયઃ સુસ્મિતમુખઃ કાલિયાહિફણાનટઃ ।
વિભુર્વિષહરો વત્સો વત્સાસુરવિનાશનઃ ॥ ૭૯॥

વૃષપ્રમથનો વેત્તા મરીચિર્મુનિરઙ્ગિરાઃ ।
વસિષ્ઠો દ્રોણપુત્રશ્ચ દ્રોણાચાર્યો રઘૂત્તમઃ ॥ ૮૦॥

રઘુવર્યો દુઃખહન્તા વનધાવનસશ્રમઃ ।
ભિલ્લગ્રામનિવાસી ચ ભિલ્લભિલ્લિહિતપ્રદઃ ॥ ૮૧॥

રામો રવિકુલોત્તંસઃ વૃષ્ણિગર્ભો મહામણિઃ । var પૃશ્નિગર્ભો
યશોદાબન્ધનપ્રાપ્તો યમલાર્જુનભઞ્જનઃ ॥ ૮૨॥

દામોદરો દુરારાધ્યો દૂરગઃ પ્રિયદર્શનઃ ।
મૃત્તિકાભક્ષણક્રીડો બ્રહ્માણ્ડાવલિવિગ્રહઃ ॥ ૮૩॥

બાલલીલાવિનોદી ચ રતિલીલાવિશારદઃ ।
વસુદેવસુતઃ શ્રીમાન્ ભવ્યો દશરથાત્મજઃ ॥ ૮૪॥

વલિપ્રિયો વાલિહન્તા વિક્રમી કેસરી કરી ।
સનિગ્રહફલાનન્દી સનિગ્રહનિવારણઃ ॥ ૮૫॥

સીતાવામાઙ્ગસંલિષ્ટઃ કમલાપાઙ્ગવીક્ષિતઃ ।
સ્યમન્તપઞ્ચકસ્થાયી ભૃગુવંશમહાયશાઃ ॥ ૮૬॥

અનન્તોઽનન્તમાતા ચ રામો રાજીવલોચનઃ ।
ઇત્યેવં નામસાહસ્રં રાજેન્દ્ર તનયસ્ય તે ॥ ૮૭॥

યઃ પઠેત્પ્રાતરુત્થાય ધૌતપાદઃ શુચિવ્રતઃ ।
સ યાતિ રામસાયુજ્યં ભુક્ત્વાન્તે કેવલં પદમ્ ॥ ૮૮॥

ન યત્ર ત્રિગુણગ્રાસો ન માયા ન સ્મયો મદઃ ।
તદ્યાતિ વિરજં સ્થાનં રામનામાનુકીર્તયન્ ॥ ૮૯॥

ન તે પુત્રસ્ય નામાનિ સંખ્યાતુમહમીશ્વરઃ ।
સંક્ષેપેણ તુ યત્પ્રોક્તં તન્માત્રમવધારય ॥ ૯૦॥

યાવન્તિ સન્તિ રૂપાણિ વિષ્ણોરમિતતેજસઃ ।
તાવન્તિ તવ પુત્રસ્ય પરબ્રહ્મસ્વરૂપિણઃ ॥ ૯૧॥

પાઞ્ચભૌતિકમેતદ્ધિ વિશ્વં સમુપધારય ।
તતઃ પરં પરબ્રહ્મ વિદ્ધિ રામં સનાતનમ્ ॥ ૯૨॥

નશ્વરં સકલં દૃશ્યં રામં બ્રૂમઃ સનાતનમ્ ।
એતદ્ધિ તવ પુત્રત્વં પ્રાપ્તો રામઃ પરાત્પરઃ ॥ ૯૩॥

સદ્બેદૈરપિ વેદાન્તૈર્નેતિ નેતીતિ ગીયતે । var વેદાન્તે
તમેવ જલદશ્યામં રામં ભાવય ભાવય ॥ ૯૪॥

ય એતત્ પઠતે નિત્યં રામસાહસ્રકં વિભો ।
સ યાતિ પરમાં મુક્તિં રામકૈવલ્યરૂપિણીમ્ ॥ ૯૫॥

મા શઙ્કિષ્ઠા નરાધીશઃ શ્રીરામરસિકસ્ય ચ ।
અનન્તકોટિરૂપાણિ રામસ્તેષાં વિભાવકઃ ॥ ૯૫॥

ત્રૈલોક્યમેતદખિલં રામવીર્યે પ્રતિષ્ઠિતમ્ ।
વિજાનન્તિ નરાઃ સર્વે નાસ્ય રૂપં ચ નામ ચ ॥ ૯૭॥

ય એતસ્મિન્ મહાપ્રીતિં કલયિષ્યન્તિ માનવાઃ ।
ત એવ ધન્યા રાજેન્દ્ર નાન્યે સ્વજનદૂષકાઃ ॥ ૯૮॥

ઇતિ શ્રીમદાદિરામાયણે બ્રહ્મભુશુણ્ડસવાદે વસિષ્ઠકૃતનામ-
સહસ્રકથનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*rAmasahasranAmastotram from bhuShuNDirAmAya*
pdf was typeset on October 22, 2021

Please send corrections to *sanskrit@cheerful.com*